ओमाङोः ४ । १ । ८२ । अवर्णान्तादोमाङि चैतयोः परतः पररूपं भवति । तवौकारः । अद्य आ ऊढा ।

[१]तद्वत् । ४ । १ । ७५ । तयोरिव तद्वत् । तयोः पूर्वपरयोः यत्कार्यं तत्कृतेऽप्येकादेशे यथा स्यात् । अद्योढा ।

स्वेऽकोदीः ४ । १ । ८८ अकः स्वेऽचिपरे पूर्वपरयोरेकोदीर्भवति । लोकाग्रम । कवीन्द्रः । मधूदकम् । पितृषभः ।

एङोऽति [२]पदान्तात् ४ । १ । ९९ । एङः पदान्तादति परतो द्वयोरेकः पूर्वो भवति मुनेऽनघ । साधोऽनघ ।

मयोवोऽच्युञः ५ । ४ । १५ । मयः परस्योञो वो वा भवत्यचि परे । शमु अत्र । शम्वत्र ।

वेकोऽसेऽस्वे प्रः ४ १ । १०४। इकः अस्वेऽचि परतः प्रो वाभवत्यसे परे । कुमारि अत्र । कुमार्यत्र । दधि अत्र दध्यत्र। प्रादेश सामर्थ्यादत्र यण् न भवति । सविधौ च न स्ववयि कुमार्यंत्र । असे इति किं । नृयोदम् ॥

अचो रहाद्वे ५ । ४ । १२६ । अच उत्तरौ यौ रेफ हकारौ ताभ्यामुत्तरस्य यरो द्वे भवतः शिर्व्यारोहणम् ।

ऋत्यकः ४ । १ । १०५ । ऋकारे परतोऽको प्रादेशो वा भवति । महऋषिः । महर्षिः ।

शित्सर्वस्य १ । १ । ५२ । शिदादेशः सर्वस्य स्थाने वेदितव्यः ।

---

१—वर्णमात्रश्रुति धर्मानति देशोऽनेन योध्यते तेन मालाभि दित्यत्र न । २—पदान्तात् किम् । भो अति भवति

**पुमः खय्यम्परे सीसुक्** ५ । ४ । १ । पुम इत्येतस्य यदन्त्यं पदान्ते वर्तमानस्य [1]अम् परे खयि परतः सीरादेशः सुक् चा-गमः पर्यायेण भवतः । [2]पुँस्कोकिलः । पुंस्कोकिलः ।

**नश्छव्यप्रशान्** ५ । ४ । २ नकारान्तस्य पदस्याम् परे छवि स भवत्यनुस्वारपूर्वः प्रशान्तं वर्जयित्वा । भवांस्तरति ।

**छवि** ५ । ४ । २५ ॥ छवि परतो रेफस्य सकारादेशो भवति । कश्छिनत्ति ।

**नॄनः पि रीरिम्वा** ५ । ४ । ५ ॥ नॄन् शब्दस्य पकारे परे रीरादेशो रुश्चागमः पर्यायेण स्तः । नॄँ ~ पाहि । नॄँः पाहि नॄन्पाहि ।

**~क ~पौ च** ५ । ४ । २२ ॥ कुप्वोः परतः रेफस्य ~क ~पौ च । इत्येतावादेशौ भवतो विसर्जनीयश्च । क ~ करोति । कः करोति । क ~ पचति । कः पचति ।

**परो झिः** । ५ । ३ । २ ॥ प्रकृतयोर्द्विरुक्तयोः परोवयवो [4]झिसंज्ञको भवति ।

**करकादिषु** ५ । ४ । ३६ ॥ करकादिषु परतः रेफस्य सकारादेशो भवति । करकः । कौतस्कुतः ।

**रोऽसुपि**[5] ५ । ३ । ७८ ॥ अहन्नित्यस्य रेफादेशो

१ अम् किम् । पुंक्षीरं । खयि किं । पुंदासः । २ पुमांश्चासौ कोकिलश्च पुँस्कोकिलः । अत्र यः सः । अप्रशान्किं प्रशान्तनोति । ३ नॄनिति द्वितीयान्तानुकरणं षष्ठ्यन्तम् ।

४ इत एव निर्देशात्पर शब्दोऽवयववाचकः । ५ सुपि किं । अहोभ्याम् । ६ इकारेत्संज्ञाया अभावेनात्र रादश्योरित्यस्याप्राप्तिः

भिद्रु । एवं गिरिकथ्यादयः । अनङ् सौ । ५ । । ७० । सख्युर्गोरनङादेशो भवत्यकौ सौ । उः शान्त्योलुङ् । १ । १ । ७७ अलामन्तस्य समीपोऽलुङ्संज्ञो भवति । घेऽकौ । ४ । ४ । ४६ । क्विवर्जितेधे परतो नकारान्तस्य गोरुङो दीर्घो भवति। हल्ङ्यापो द्यःसुसिप्त्यनच् ।४ । ३ । ५६। हलन्तादीरूपात्यो ङ्यापन्तद्द्वन्ताच परेषामनचां सुसितीनां खं भवति । नखं मृदन्तस्याकौ ४ । ३ । ३० । पदस्य योऽयमन्तो मृदन्तस्य नस्य खं भवति, नतु कौ । सखा । सख्युरकौ ५ । १ । ६ । सखिशब्दात्परोऽकि विषयो णिद्भवति ञ्णित्यचः ।५। २ । ३ । अजन्तस्य गोरैप्भवति ञिति णिति च परे ।सखायौ । सखायः । हे सखे । सखायम् सखायौ । सखीन् सख्या । सख्ये । ख्यत्यादुतः ।४ । ३ । ६६ । खित्तीती शब्दाभ्यां परयोर्ङसिङसोरत उद्भवति । सख्युः । औदश सेः[1] इति ङेरौत् । सख्यौ । शेषं मेमिवत् । पतिः से १ । २ । ६७ । पति शब्दः से एव सुसंज्ञो भवति । जिनपतिना । सर्वं नेमिवत् । से एवेति किम् । पत्या, पत्ये । पत्युः पत्यौ । कतिशब्दो नित्यंबहुवचनान्तः । ष्णान्तेत् १ । १ । ३४ । षकारनकारान्ता संख्याकतिशब्दश्चेत्संज्ञौ भवतः । उसुजुस् १ । १ ।

---

१ हल्ङ्यापः किम् । राजा, ग्रामणीः । द्यः किम् । निष्कौशाम्बिः । सुसिप्तीति किम् । अभैत्सीत् ।अनचः किम् । बिभर्ति।

६२। उप्, उच्,उस्–संज्ञाभिर्भावितस्य नाशम्यैसाः पृथक्संज्ञा भवति। उश्विस: ।५। । १६ ।इत्संज्ञकादुत्तरयोर्जस्शसोरुव् भवति । स्यखे स्थाश्रयम् । । १। ६३ स्यस्य खे कृतेऽपि त
तदा श्रितं कार्यं भवति । इति जसः खेऽपि तदाश्रये पपि प्राप्ते । नोमता गोः।१। १ । ६४। [1]उमताशब्देन नाशिते स्ये गोस्त- दाश्रितं कार्यं न भवति । [2]कति २ । इत्यादि । त्रिशब्दो नित्य बहुवचनांतः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः २ ॥ त्रेस्त्रयः ५ । १ । ३५ । त्रीत्यस्य त्रयादेशो भवत्यामिपरे । त्रयाणाम् त्रिषु । गौणत्वेऽपि । परमत्रयाणां। त्रिषु । द्विर्नित्यं द्विवचनांतः । त्यदादेरः।५। १ । १६१ । त्यदादीनामकारादेशो भवति विभ- क्त्याम् [अत्रयिधिप्रति द्विपर्यन्तास्त्यदादयः] । द्वौ २ । द्वाभ्या- म्३। द्वयोः२। पाति लोकमिति पपीः सूर्यः।पप्यौ । पप्यः। हे पपीः पपीम् । पपीन् । पप्या । पपीभ्याम् ३ । पपीभिः। पप्ये । पपीभ्यः २। पप्यः । पप्योः २ दीर्घात्म्रि नुट्–पप्याम्। ङौतु स्वेकोदीः पपी । पपीषु । एवं वातप्रम्यादयः । य्वौस्त्र्याख्यौ मुः १। २ । ६१ । ईदून्तौ स्त्र्याख्यौ मुसंज्ञौ स्तः । आख्याग्रहणं स्त्रीत्वे [3]न्यग्भूतेऽपि मुसंज्ञार्थं। म्रोऽम्बार्थस्वोः।५।२।१०२।अम्बार्थ वाचकानां मुसंज्ञकस्य च म्रो भवति कौ परतः । हे अतिलक्ष्मि । आण्मोः।५।२।१०७। मुसंज्ञकाद्राः परस्य ङितोऽडागमो भवति। आटश्च।४।३।७८।अटोऽचि परतो द्वयोरेके ऐ भवति अतिलक्ष्म्यै

---

1. का संख्याये षामिति विग्रहः । 2 उमतेति किम् । कार्यंते, हार्यंते इत्यादि । 3 विशेषणी भूतेऽपीत्यर्थः

उत्तर पूर्वस्मै, उत्तर पूर्वायै। तीय स्येति वा सर्वनाम संज्ञा ङित्सु। द्वितीयस्यै, द्वितीयायै। एवं तृतीया।" [प्रोऽम्बा- र्थयोः"]। हेअम्ब। हेअक्क। हेअल्ल। जरा जरसौ इत्यादि। पक्षे रमावत्। सिद्धोः लिध्या। ङिति ह्रस्वश्च ।१।४।६। ईयू- स्थानौ स्त्र्याख्यौ इयुवोश्च स्थानिनौ यौ ह्रस्वौ तेषां ङिति चानुसं- ज्ञा भवति। सिद्ध्यै। सिद्धये।सिद्ध्याः२।सिद्धेः२। इदुद्भ्याम्।७। ३।११७। नदीसंज्ञकाभ्यामिकारोकाराभ्यां परस्य ङेराम् भव- ति। सिद्ध्याम्। सिद्धौ। शेषं नेमिवत्। एवं मत्यादयः त्रिचतुरोः स्त्रियां तिसृचतसृ ७।२।९९। स्त्रीलि- ङ्गयोरेतौ स्तो विभक्तौ। अचि र ऋतः।७।२।१००। तिसृ चतस्रोः ऋकारस्य रेफादेशो भवत्यचि। तिस्रः२। तिसृभिः अतिसृचि प्रतिषेधान्न दीर्घः। तिसृणाम्। तिसृषु। द्वे २। द्वाभ्यां ३। द्वयोः। गौरी, गौर्यौ, गौर्यः। हे गौरि गौर्यै इत्यादि। एवं नद्यादयः। लक्ष्मीः। शेषं गौरीवत्। एवं तर्यादयः॥ स्त्री। हे स्त्रि। स्त्रियाः।६।४।७९। स्त्रिया इयङादेशो भवत्य जादौ सुपि। स्त्रियौ स्त्रियः। वाम् शसोः ६।४।८०। अम् शसोः परतः स्त्रिया इयङादेशो वा भवति। स्त्रियम्। स्त्रीम्। स्त्रियः स्त्रीः स्त्रिया। स्त्रियै स्त्रियाः२। स्त्रियोः२। परत्वान्नुडि, । स्त्रीणां स्त्रि- याम्। श्रीः। श्रियौ। श्रियः। आमीयुवोः¹ १।४।५। वा १।४।५। इयुवोः स्थानिनौ स्त्र्याख्यौ यौ आम्येव वा नदीसंज्ञौ भवतः। तेन नाम्यत्र। हे श्रीः। श्रियै, श्रिये। श्रियाः

---

१ अत स्त्रीत्वाभावात्!

कारादेशो भवति समाने परे । (अचोरहाभ्यां द्वे) चतुर्णाम् । **रेश्च सुपि** । ५ । ४ । २४ । ईप्बहुवचने परतो रेरेव सकारादेशो भवति विसर्जनीयश्च । षत्वम् । षस्य द्वित्वे[1] प्राप्ते । **शरः** ५ । ४ । २५ । शरोऽचि परे द्वे रूपे न भवतः । चतुर्षु । **नोनः** । ५ । ३ । ८३ । षोर्नस्य नो भवति पदान्ते । प्रतान् । प्रतान्सु । **किमः कः** । ५ । १६२ । किमः का देशो भवति विभक्त्याम् । कः । को । के । शेषं सर्ववत् । **इदमोऽमः** ५ । १ । १६६ । इदमो-मान्ता देशो भवति सौ परतः । अस्य बाधनार्थ मिदं वचनम् । **पुंसीदोऽय्** ५ । १ । ६६ । इदम इदोऽय् सौ पुंसि । अयम् । त्यदाद्यत्वे[2] । **एत्यतोऽपदे** । ४ । ३ । ८४ । अकारस्य परत्वं भव-त्य परे एपि परतः । **दः** । ५ । १ । १६७ । इदमो दस्य मादेशो भवति विभक्त्याम् । इमौ । इमे । इमम् । इमौ । **अनाप्यकः** । ५ । १ । १७० । अककारस्येदम इद्रूपस्यान इत्ययमादेशो भवत्यापि विभक्त्याम् । अनेन । **हलि खम्** । ५ । १ । ३ । ७२ अककारस्येदमइद्रूपस्य खं भवत्यापि हलादौ विभक्तौ । (नानर्थकेऽन्ते ऽलो विधिः) । आभ्याम् । **इदमदसोः सकोः** । ५ । १ ।

१ निमित्ता न धिकरणा निमित्तमत्पनः । षत्वम् समान पदत्वम् ।

२ आपिति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः स्वी-क्रियते ननु टाप् । विभक्त्यामितिविशेषणात् ।

३ यमपुंसि किम् ? ।

**एकाजुत्तरपदे णः** ।८।४।१२। एकाचि यौ स्थितस्य सुप् स्त नुम्विभक्तिनकारस्य णो भवति । वृत्रहणौ । वृत्रहणः । शसि । अनः खे कृते । **हो हन्तेर्ञ्णिन्नेषु** ।७।३।५४। हन्ते हंकारस्य कुत्वं भवति ञिति णिति त्येनकारे च परतः । वृत्रघ्नः । शार्ङ्गी शार्ङ्गिणौ । शार्ङ्गिणः । एवमर्यमन् पूषन् । इत्यादि । मघवा बहुल मित्यनेन वातृवत्यः । **उगिदचां घेऽधातोः**।७।१।७० उगितामचाञ्चादीनामञ्चतेश्च घे परतो नुम् भवति । वीत्वम् । मघवान् । मघवन्तौ । मघवन्तः । हे मघवन् । मघवद्भ्याम् । पक्षे मघवा । सुटि राजवत् । **श्वयुवमघोनामतद्धिते** ६।४।१३३। भसंज्ञानामन्तानामेषां ञिर्भवति न तु हति । स्थाने कृतान्त्ययिस्योकारः । मघोनः । मघोना मघवभ्याम् एवं श्वन् युवन् । अनन्त्यविकारेऽन्त्य सदेशस्येति परिभाषामाश्रित्य परस्यैव ञिर्भवति न तु वस्य । यूनः । यूना । युवभ्यामित्यादि । **पथिमथ्यृभुक्षामात्** ।७।[1]।८५। एषामाकारोऽन्तादेशः स्यात्सौ । **इतोऽत्सर्वनामस्थाने** ।७।१।८६। पथ्यादीनामिकारस्याकारादेशो भवति घे परतः । **थोन्थः** ।७।१।८७। पथिमथोस्थस्यन्थादेशो भवति घे परे । पन्थाः । पन्थानौ । पन्थानः । **भस्य टेर्लोपः** ।७।१।८८। भसंज्ञकस्य पथ्यादे र्लोपं भवति । पथः पथा । पथिभ्याम् एवंमथिन्, ऋभुक्षिन् ष्णान्तेन् । षट् । षड्भिः । षड्भ्यः । **नोऽङ्गः**।८।४।४२।

[ १ ] भाविनः सुटो निवृत्यर्थं सनुट्क निर्देशः ।
( २ ) भस्येति किम् । उदञ्चौ ।

नान्तस्योक्तो दीर्घंभवतिनामिपरे । पञ्चानाम् । पञ्चसु विभक्त्यामाष्टन: ।५।१।१४३। अष्टन आकारान्तो देशो वा भवति विभक्त्याम् । अष्टाभ्य औश् ।५।१।१८। आत्व पक्षेऽष्टनः परयोर्जस् शसोरौश् भवति । अष्टभ्य इति सिद्धे कृतात्वस्याच्चारणं यत्रैवात्वं तत्रैवौशिति। अष्टौ ।अष्टौ अष्टाभि अष्टाभ्यः। अष्टानाम् । अष्टासु । आत्वाभावे पञ्चवत् । ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चः । २।१।५७। ऋत्विगादयः कर्तानिपात्यन्ते, अञ्चुयुजिकुञ्चिभ्यस्तु क्विर्विधीयते । कृदमिङ् । २।१।८०। अत्र धोरधिकारे मिङ्वर्जितास्त्याः कृत्संज्ञा भवन्ति । क्विन्यस्यकुः ।५।२।७५। क्विन्यो यस्मात्तस्यकवर्गोऽन्तादेशो भवति पदान्ते । ऋत्विक्—ग् । ऋत्विजौ । ऋत्विजः । ऋत्विग्भ्यामित्यादि । युजेरसे ।१।५०। योगार्थस्य युजेरसे नुम भवति धे परे।सुखे स्यान्तस्य खे न्याकृते नस्य कुत्वेन ङः । युङ् । युजौ । युजः । युग्भ्याम् । चोः कुः ।५।२।३०। चवर्गस्य कवर्णः स्याज्झलि पदान्ते च । भिषक्-ग् । भिषजौ । भिषजः । भिषग्भ्याम् । खन् । खञ्जौ । खञ्जः । खन्भ्यामित्यादि । व्रश्चभ्रस्जसृजमृजयजराज् भ्राजश्छशांषः ।५।५३। एषाञ्छशान्तयोश्च षो भवति झलि पदान्ते च जश्त्वचर्त्वे । राट् । राड् । राजौ । राजः । राड्भ्याम् । राट्सु । परिव्राट ।५।२।६६। परिव्राट् शब्दस्य क्विबन्तस्य कृतदीत्वस्य पदान्ते षत्वं निपात्यते । एवं कर्मपरिभृट् । देवेट् । विश्वसृट् । सृजियजयोः क्विप्येति कुत्वमपवाद्यपरत्वमनयकारा-

अव्राजीत् । अव्रजिष्यत् । कटे वर्षावरणयोः । ११ । कटति । चकाट । चकटतुः । कटिता । कटिष्यति । कटतु । अकटत् । कटेत् । कट्यात् । सू(१)ह्म्यन्तक्षणश्वसजागृणिश्व्येदि-ताम् । ७ । २ । ५ । हमयान्तस्य क्षणादेर्ण्यन्तस्यश्वयतेरेदिताञ्चैव् न स्यादिडादौ सौ । अकटीत् । अकटिष्यत् । गुपू रक्षणे । १२ । गुपूधूपविच्छिपणिपनिभ्य आयः (२) । ३ । १ । २८ । एभ्य आयस्त्यो भवति स्वार्थे । सद्यन्ता धवः । ३ । १ । ३२ । येऽनुक्रांताः सन्नादयस्तदन्ता शब्दा धु संज्ञाभवन्ति । धुत्वाल्लडादयः । गोपायति । आयादय आर्धधातुके वा । ३ । १ । ३१ । अगे परत आयादयो वा भवन्ति । आमो मस्य नेत्वम् । उच्चारण सामर्थ्यात् । कास्यनेकाच आम् लिटि । ३ । १ । ३५ । कासेरनेकाज्भ्यश्चाम् स्याल्लिटि । सूत्रे त्य ग्रहणं स्पष्टार्थम् । अतः खम् । ६ । ४ । ४८ । अकारान्तस्य खं भवत्यगे परतः । आमः । २ । ४ । ८१ । आमः परस्य खं भवति । लिड्वत्कृञि । ३ । १ । ३६ । कृञिति प्रत्याहारेण कृभ्वस्तीनां ग्रहणम् । लिड्वदामन्तात् कृभ्वस्तयोऽनुप्रयुज्यन्ते । उरः । ७ । ४ । ६६ । चस्य ऋवर्णस्य अका-

(१) अग्रहीत् । अधमीत् । अह्यीत् । अक्षणीत् । अश्वसीत् । अजागरीत् । औनयीत् । अश्वयीत् । अकटीत् इति सूत्रोदाहरणानिज्ञेयानि ।

(२) गोपायति । धूपायति । विच्छायति । पणायति । पनायति । पणेस्तुतावेव आयस्त्यः । व्यवहारेतुन ।

कामयितासे । कमिता । कामयिष्यते । कमिष्यते । कामयताम् । अकामयत । कामयेत । कामयिषीष्ट ॥ धेटः । ५ । ४ । ६१ । इ(१)णः परो य इट् ततः परेषां षीध्वं लुङ् लिटां धस्य ढः । कामयिषीढ्वम् । कामयिषीध्वं । कमिषीष्ट । कमिषीध्वं ॥ णिश्रिद्रुस्रुकमेः कर्त(२)रि कच् । २ । १ । ५६ । ण्यन्तेभ्यः श्रादिभ्यश्च कर्त्रर्थाच्चिनि लुङि परे कच् भवति ॥ णेः । ४ । ४ । णेः खं भवत्यगे परतः ॥ णौ कच्युकः प्रो ऽशास्वकृदितः । ५ । २ । १२८ । कच् परे णौ (३)उकः प्रो भवति । लिङ्चकणि घोरितिद्वित्वम् । धौकच्यन कृत्वेसन्वत् । ५ । २ । १८९ । कच्यक परेधौ सनीवकार्यं भवत्यनकृत्वे । सन्यतः । ५ । २ । १७६ । धस्यातइत्वं भवतिसनि । घेर्दीः । ५ । २ । ११० । धस्यघेर्दीर्भवतिल ल्घुभावविषये । अचीकमत । णिङभावपक्षे ।

अचकमत । अकामयिष्यत । अकमिष्यत । अय गतौ ॥ ३ ॥ अयते । गेरयौ ५ । ३ । ५२ । गेर्यौरेफस्तस्य लादेशो भवत्य ऽयतौ परे । प्लायते । पलायते ॥ दयायासः २ । १ । ३३ । दय् अय् आस् एभ्य आम् स्याल्लिटि ॥ अयाञ्चक्रे । अयिता । अ-

(१) इणः किम् । आसिषीध्वम् ।

(२) कर्तरि किम् । अकारयिषता देवदत्तेन ।

(३) णाविति किम् । अर्लीलवदित्यादौ वचन सामर्थ्यादन्तरङ्गमपि पेर्प वाधित्वाप्रः स्यात् । ततश्चा घादेशे अलीलुव दित्यनिष्टं स्यात् ।

यिष्यते । अयताम् । आयत । अयेत । अयिषीष्ट "वेट" । अयिष्येते । अयताम् । आयत । अयेत । अयिषीढ्वम् । आयिष्ट । आयिढ्वम् । आयिध्वं । आयिषीढ्वम् । अयिषीध्वम् । आयिष्ट । आयिढ्वम् । आयिध्वं । आयिष्यत । द्युत दीप्तौ ॥ ४ ॥ द्योतते ॥ द्युनि स्वाप्यो र्जिः ५ । २ । १६६ । अनयोः चस्य इक् स्याल्लिटि । दिद्युते ॥ द्युद्भ्यो लुङि । १ । २ । ८६ । द्युतादिभ्यो लुङि परे वा मं भवति । (१)अद्युतत् । अद्योतिष्ट । अद्योतिष्यत । एवं श्विताङ् वर्णे ॥ ५ ॥ ञिमिदाङ् स्नेहने ॥ ६ ॥ ञिष्विदाङ् स्नेहनमोचनयोः ॥ ७ ॥ रुचं अभिप्रीतौ च ॥ ८ ॥ घुटै परिवर्तने ॥ ९ ॥ शुभै दीप्तौ ॥ १० ॥ क्षुभै संचलने ॥ ११ ॥ णभुङ् भ्रंसुङ् अवसंसे ॥ १२ ॥ ध्वंसुङ् गतौ च । १३ । स्रम्भुङ् विश्वासे । १४ । वृतुङ् वृत्तौ । १५ । वर्तते । ववृते वर्तिता ॥ स्यसनो-र्वृद्भ्यः । १ । २ । ७७ । वृतादिभ्यः सनि स्ये च वा मं भवति ॥ न वृद्भ्यः । ५ । १ । ११६ । वृतादेः परस्य मस्य नेड् भवति ॥ वर्त्स्यति । वर्तिष्यते । वर्तताम् । अवर्तत । वर्तेत । वर्तिषीष्ट । अवर्तिष्ट । अवर्त्स्यत् । अवर्तिष्यत । ददै दाने । १६ । ददते ॥ न (२)शसददवादीनाम् । ४ । ४ । ११५ । शसेर्ददे र्वादीनां लिट्येत्वं चस्य खं च न स्यात् । ददुदे । ददहाते । ददिरे । ददिता । ददिष्यते । ददताम् । अददत । ददेत । ददिषीष्ट । अददिष्ट । अददिष्यत । अपूरुलज्जायाम् ॥ २० ॥ त्रपते । फलिभजोः । ४ । ४ ।११० ॥

---

(१) अत्र द्युद्युधादिनाऽङ् ।

(२) शशसतुः । ददद्रे ववमतु । शशसतुः । इति सूत्रोदाहरणानि ।

जनीजी(१)। ५ २। ७७। अनयोर्जा देशो भवति शितिपरे। जायते । जज्ञे। जनिता। जनिष्यते। दीपजनबुधपूरिताथिप्यायो वा ३।१।६१। दीपादेः कर्तरि लुङि ते चिण् भवति। चिणो लुक् ।६।४।१०४। चिणः परस्य तस्य लोपो भवति। जनिवध्योः। ७।३।३५। अनयोर्वृद्धिर्न स्यात् ञिति णिति च परतः। अजनि। अजनिष्ट। दीपीङ् दीप्तौ। २०। दीप्यते। दिदीपे। अदीपि। अदीपिष्ट। पदीङ्गतौ। २१। पद्यते। पेदे। पत्ता। पत्सीष्ट। चिण्ते पदः। ३।१। पदेर्धोर्लुङि ते परे चिण् भवति। अपादि। अपत्साताम्। अपत्सत। विदीङ् सत्तायाम्। २२। विद्यते। वेत्ता। अवित्त। बुधीङ् ज्ञाने। २३। बुध्यते। बोद्धा। भोत्स्यते। भुत्सीष्ट। अबोधि, अबुद्ध। अभुत्साताम्। युधीङ् संप्रहारे। २४। युध्यते। युयुधे। योद्धा। अयुद्ध। सृजीङ्विसर्गे। २५। सृज्यते। ससृजे। ससृजिषे। (२)झल्य किति सृजदृशोऽम्। ४।

(१) जइति उच्चारणेऽपि=यञ्यतोदीः=इतिदीत्वे सिद्धे जाग्रहणमङ्गस्यपरिभाषाज्ञापनार्थम् । तेनपाधोः पिबादेशो भवति पवनमपति। पिबा देशस्यादन्तत्वाश्रयणं तूपायान्तरम्।

(२) झलि किम्। सर्जनम्। अकिति किम्। दृष्टः। धोः स्वरूप ग्रहणात् इह सृजिदृशि विकारादिह न। विश्वसृड्भ्याम्। देवदृग्भ्याम्।

## अथ ण्यन्तप्रक्रिया।

**स्वतन्त्रः(१)कर्ता।१।२।१२४।** स्वतन्त्रः आत्मप्रधानः कर्तृ(२) संज्ञो भवति॥ **तत्प्रयोजको हेतुः।१।२।१२५।** स्वतन्त्रस्य प्रेरको यः स हेतुसंज्ञा भवति। **हेतुमति।३।१।२६।** हेतु(३)मतिच्यर्थे णिच् स्यात्। भवंतं प्रेरयति भावयति भावयते। **ओः(४)पुयण्ज्यपरे।७।४।८०।** सन्यतः इत्त्वं स्यात् पवर्गयण् जकारे ष्ववर्णे परेषु परतः। अबीभवत्। ष्ठा गतिनिवृत्तौ।१। **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ।७।३।३६।** अर्त्यादीनामाकारान्तानां च णौ परे पुगागमः स्यात्। स्थापयति। **अत उपधायाः।७।२।११६।** अस्योपधायाः अत आकारः स्यात् ञिति णिति परे। अतिष्ठिपत्। घट चेष्टायां॥२॥ **मितां ह्रस्वः।६।४।९२।** घटादीनां ज्ञपादीनां

---

(१) प्रधानीभूतधात्वर्थाश्रयत्वं स्वातंत्र्यम्। कर्तृसंज्ञाधातूपात्तव्यापाराश्रयत्वं।

(२) प्रेरकः=प्रयोजकः तदुक्तव्यापारानुकूलव्यापारवानित्यर्थः॥

(३) स्वनिष्ठाधारतानिरूपिताधेयता सम्बन्धेनहेतुर्यत्राविद्यतेसहेतुमान् व्यापारः। तादृशप्रयोजकव्यापारेप्रेषणादौ च वाच्येणिच्स्यादिति फलितार्थः।

(४) पक्षे वाक्यमपि साधु।

# अथ यङन्तप्रक्रिया ।

**धातोरेकाचो हलादेः क्रियासमभिहारे यङ्(१)** । ३ । १ । २२ ।

धो यङ् भवति क्रियासमभिहारे ॥ **सन्यङोः** । ६ । १ । ९ । **गुणो यङ्लुकोः** । ७ । ४ । ८२ । यङि यङ्लुकि च परतः अभ्यासस्य गुणो भवति । ङित्त्वादात्मनेपदम् । पुनः पुनरतिशयेन वा भवति बोभूयते । बोभूयाञ्चक्रे । अबोभूयिष्ट । **नित्यं कौटिल्ये गतौ** । ३ । १ । २३ । नित्यं यङ् भवति गति विशेषे गम्यमाने ॥ **दीर्घोऽकितः** । ७ । ४ । ८३ । अकितोऽभ्यासस्य दीर्घो भवति यङ्यङ्लुकोः । कुटिलं व्रजति वाव्रज्यते ॥ **हलो यः(२)** । ६ । ४ । ४९ । हलः परस्य यकारस्य लोपो भवत्यार्धधातुके । यस्य लोपः । अतः खं । वाव्रजाञ्चक्रे । वाव्रजिता ॥ **रीगृदुपधस्य च** । ७ । ४ । ९० । ऋकारवतोऽभ्यासस्य रीगागमो भवति यङ्यङ्लुकोः । वरीवृत्यते । वरीवृताञ्चक्रे । वरीवृतिता । **लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम्** । ३ । १ । २४ । गरवं न । नरीनृत्यते । जरीगृह्यते । इति यङन्तप्रक्रिया ॥३॥

# अथ यङ्लुक् प्रक्रिया ।

**यङोऽचि च** । २ । ४ । ७४ । यङोऽचि प्रत्यये लुक् भवति । बहुलग्रहणात्तं विनापि क्वचित् । लुके त्याश्रयन्यायेन द्वित्वादिः । चकारार्थे च । धात्वादेशयः । अदादिपाठाच्छपो लुक् ।

(१) एकाच इत्येव । तेन सूत्रजागरीतिविग्रहे यङ् न । हलादेरित्येव । तेन भृशमीक्षते इति विग्रहे यङ् न ।

(२) य इति संघात ग्रहणम् । संघात ग्रहणं किं ईर्ष्यिता ।

रतः पदसंज्ञा भवति । न त्वं । राजीयति । नान्तमेवेति किम्- वाच्यति । क्या(१)च्यस्य । ४ । ४ । ५१ । हलः परयोः क्यच्क्यङोः खं वा स्यादगे । परस्यादेः । अतः खंः । तस्य स्थानिवत्वात् ध्युङः इत्येव न । समिधिता । समिध्यिता । का(२)म्यः । २ । १ । ७ । उक्तविषये काम्यः स्यात् । पुत्रकाम्यति । पुत्रकाम्यिता । गौणादाचारे । २ । १ । ८ । गौणादिबन्तादाचारेऽर्थे वा क्यञ् भवति । पुत्रमिवाचरतीति पुत्रीयति छात्रम् । विष्णूयति द्विजम् । ( सर्वमृदभ्यः क्विप् भवतीत्येके ) अश्व इवाचरति अश्वति । स्व इवाचरति स्वति । ङ(३)स्य क्विझलोः क्ङिति । ४ । ४ । १२ । ङसंज्ञकस्योङीः क्वौ झलादौ च क्ङिति । इदमिवाचरति इदामति । राजेव राजानति । पन्था इव पथीनति ॥ कष्टाय । २ । १ । १२ । अथन्तात्कष्टाद्वाकुत्साहेऽर्थे क्यङ् भवति । कष्टायक्रमते कष्टायते । पापं कर्तुमुत्सहत इत्यर्थः । रोमन्थतपः शब्दवैरकलहाभ्रकण्वमेघात्कृणि । २ । १ । १४ । एभ्यः करोत्यर्थे क्यङ् भवति । शब्दं करोति शब्दायते । सुखादेरनुभवे । ३ । १ । १ । २८ ।

---

(१) समिधमिच्छति । समिधिवाचरतीति विग्रहे क्यच् क्यङौ भवतः ।

(२) कस्य नेत्वम् । उच्चारण सामर्थ्यात् ।

(३) ङस्येति किम् । ओदनपक् । क्वौझलादौ च किम् गम्यते । क्ङितीति किम् । गन्ता ।

शतमपजानीते । अलपतीत्यर्थः । घेः । १ । २ । ४१ । जानातेर्दो भवति । सर्पिषो जानीते सर्पिषोपायेन प्रवर्तत इत्यर्थः । उदश्चरोऽ(१)घेः । १ । २ । ४८ । गुरुवचनमुच्चरते । उत्क्रम्यचरतीत्यर्थः । समो मया । १ । २ । ४९ । रथेन सञ्चरते । दणोकृतस्तुपायमः । १ । २ । ५० । उपपूर्वाद्यमः स्वकृतार्थे दो भवति । दारया संयच्छते का(२)मी । सनः पूर्ववत् । १ । २ । ५७ । पूर्वो यो धुस्तद्वत्सन्नन्ताद्दो भवति । शिशयिषते । पदिधिषते ॥ हलन्तात् । १ । १ । ८४ । इको(३)ऽन्तः समीपो यो हल् तदन्तादुत्तझलादिः सन्किद्भवति । निविविक्षते ॥ गन्ध(४)नावक्षेपसेवनान्याय्यप्रतिपलप्रकथोपयोगेकृञः । १ । २ । २७ । एष्वर्थेषु कृञो दो भवति । गन्धनं—सूचनं । उत्कुरुते । सूचयतीत्यर्थः । अवक्षेपो—भर्त्सनम् । श्येनो वर्ति-

---

कोधमायतद्रुपपादकाभावप्रतिपादनेच्छाभावत्वाद इति हृदयम् ।

(१) अधेरिति किम् । बाष्पमुच्चरति । उपरिष्टाद्गच्छतीत्यर्थः ।

(२) कामी स्वस्यैवदातीत्यर्थः । अशिष्टव्यवहारेऽर्थेभावत्कथा इति नियमेन मा भवति ।

(३) इकोऽन्तात् किम । यियक्षते । झलादिः किम् । विवर्तिषते । कर्तरीत्येव । भावकर्मणो मांभूत् ।

(४) एषु किम् । कटं करोति ।

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव । विधेर्विधानं बहुधा समीक्ष्य, चतुर्विधं बाहुलकं वदन्ति ॥ १ ॥ स्नात्यनेन इति स्नानीयं चूर्णं । दीयतेऽस्मै दानीयो विप्रः । **घोऽचोऽरासुयुवः** । २ । १ । ८४ । अजन्ताद्धोर्घो भवति रादीन् वर्जयित्वा ॥ **ईद्यि** । ४ । ४ । ६३ । आकारांतस्य धोरीत्वं भवति । देयं । ग्लेयं । **पोरदुङोऽपि वपिरपिलपित्रपिचमः** । २ । १ । ८५ । पवर्गांताददुङो घो यो भवति वपादीन् वर्जयित्वा । शप्यम् । लभ्यम् ॥ **पिति कृति तुक्** । ४ । ३ । ५८ । प्रांत(१)स्य तुगागमो भवति पिति कृति परतः । इत्यः । स्तुत्यः । शासु अनुशिष्टौ ॥ **शास(२)इत्** । ४ । ४ । ३२ । शास इकारो भवत्याङि हलादौ च क्ङिति । शिष्यः । वृत्यः । आदृत्यः । जुष्यः । **कृमृजूवृषजपशासदुहगुहः** । २ । १ । ९८ । एभ्यः क्यप् वा भवति । कृत्यं । मृज्यं । **ण्यः** । २ । १ । १०० । धोर्ण्यो भवति । कार्यम् । भार्यम् । हार्यम् । **च(३)जोः कुघिण्ण्यतोऽस्नेऽनिटः** । ५ । २ । ५ । ५६ ।

(१) प्रांतस्येति किम् । ग्रामणीः । पिति किम् । कृतम् । कृति किम् । पटुतरः । ननु ग्रामणिकुलमित्यादौ तुक् स्यादिति चेन्न । ग्रहेशस्य बहिरङ्गत्वेनासिद्धत्वात् । अत एव तुगागमो न भवतीति बोध्यः ।

(२) अङिहलादौ च किम् । शासति । क्ङिति किम् शास्ति ।

(३) अत्र यथा संख्यं नेष्यते । तेन रक्तं रागादिति लिङ्गात् ।

भनिटो घों अकार उकारयोः कुत्वं स्यात् घिति ण्ये च परतः। मृजेर्वृ । ५ । २ ।१। मृजगौरैवृभवति। मार्ग्यः। भुजोऽन्नौ । ५ । २ । ७६ । भुजस्यार्थे ण्ये कुत्वं भवति। भोज्यम्। भोज्यमन्यत्। इति कृदन्त कृत्य प्रकृया।

## ॥ अथ कृदन्ताः ॥

ण्वुतृच् । २ । १ । १०५ । धोरेतौस्तः कर्तरि। युवोरनाकौ । ५ । १ । १ यु वु एतयो रनाकौ स्तः । कार(१) कः। कर्ता॥ नन्दिग्रहि पचादिभ्योल्युणिनऽचः । २ । १ । १०६ । नन्द्यादेर्ल्युः ग्रहादेर्णिन् पचादेरच्स्यात् । नन्दयतीति नन्दनः। जनमर्दयतीतिजनार्दनः। लवणः। ग्राही। स्थायी। मन्त्री। ज्ञाकृप्रीगुङ्गः कः। २। १। १०७। एभ्यः कःस्यात्। जानातीतिज्ञः। कृशः। प्रियः। आतोऽगो । २ । १ । ०८ । आकारान्ताद्धोः को भवति गावाचि। प्रज्ञः। सुग्लः॥ गेहेकः। २ । १ । ११० । गे(२)हे कर्तरिग्रहेः कोभवति । गृहम्। कर्मण्य(३)ण्। २ । २ । १ । कर्मणि वाचि धोरण् भवति । कुम्भ-

(१) करोतीति विग्रहः

(२) गृह्णाति धान्यादि कमिति गृहम्।

(३) अत्र त्रिविधकर्म। निवर्त्यं, विकार्यं प्राप्यं चेति भेदात् तत्र निवर्त्यं-कुम्भकारः। विकार्यः। काण्डंलु नातीतिकाण्डलावः।

क्वनिप् । २ । २ । ८१ । कर्मणि भूते । पारंदृष्टवान् पारदृश्वा । राजनि युधि कृञः । २ । २ । ८२ । क्वनिप् स्यात् । युधिरन्तर्भावितण्यर्थः । राजानं योधितवान्–राजयुध्वा । राजकृत्वा । सहे । २ । २ । ८३ । कर्मणीति निवृत्तम् । सह योधितवान्, सहयुध्वा । सहकृत्वा । जनेर्डः । २ । २ । ८४ । घे कृति बहुलं । ४ । ३ । १४ । केरलुप् । सरसिजम् । सरोजम् । क्वचित् । २ । २ । ९९ । क्वचिदन्यस्मिन्नपि जनेर्डो भवति । प्रजा । क्तक्तवतू तः । १ । १ । २८ । क्तक्तवतू तसंज्ञौ भवतः । तः । २ । २ । ८५ । धोर्भूते तसंज्ञकस्त्यो भवति । तत्र तयोरेवेति भावकर्मणोः क्तः । कर्तरि कृदितिकर्तरिक्तवतुः । उकावितौ । स्नातंमया । स्तुतस्त्वयाजिनः । द्रान्तस्य तोनः पूर्वस्यऽद्रोप् मूर्च्छिमदाम् । ५ । ३ । ५९ । (१)दकाररेफाभ्यां परस्य तसंज्ञकस्य तस्य नत्वं भवति पूर्वस्य दस्य च प्रादीन् वर्जयित्वा । शीर्णः । भिन्नः छिन्नः । इफादे(२)रातोधोर्यण्वतोऽध्यारुपः । ५ । ३ । ६० । त संज्ञकस्य तस्य नो भवति । द्राणः । ग्लानः । ल्वादेः ।

---

पुनः क्वनिप् विधानं व्यर्थमितिवाच्यम् । त्यान्तरबाधनार्थमावश्यकत्वात् ।

(१) दकार रेफाभ्याम् किम् । कृतम् । तसंज्ञकस्येति-किम् । कर्ता । पूर्वस्य किम् । परस्यमाभूत् । भिन्नवद्भ्याम् ।

(२) इफादेरिति किम् । यातः । आतःकिम् । च्युत् ।

५ । ३ । ६१ । ल्वादिभ्यस्तसंज्ञकस्य तस्य नो भवति । लूनः । ज्यानः । ग्रहिजेतीक् । हलः । ४ । ४ । २ । गोरघय(१)वाद्धलः परस्येगन्तस्य दीर्भवति । जीनः । ओदितः । ५ । ३ । ६३ । ओकारेतस्तकारस्य नो भवति । भुजो भुग्नः । टुओश्वि गतिवृद्ध्योः—उच्छूनः । शुषि पचेः कौ । ५ । ३ । ६८ । आभ्यां तकारस्य ककारवकारौ भवतः । शुष्कः । पक्वः । क्षै क्षये । क्षै मः । ५ । ३ । ६८ । क्षामः । ते सेटि । ४ ।४।५३ । णेः खं । भावितः । भावितवान् । दृह हिंसायाम् । दृढं बलिस्थूले । ५ । १ । १२४ स्थूले बलवति च निपात्यते । धाश्च्योर्हिः । ५ । २ । १४६ । धाश्च्यो र्हिर्भवति । हितम् । दो दद्धोः । ५ । २ । १४८ । दा इत्येतस्य भुसंज्ञकस्य दद्भवति किति परे । चत्वं । दत्तः । लि(२)टः कसुकानौ । २ । २ । १०३ । लिटः स्थाने क्वसुकानौ स्तः । "ऊचानदः" । चकाणः । म्वोः । ५ । २ । ८४ । धो मकारस्य नत्वंभवति म्वो परतः । जगन्वान् । (३)सद्धृटः । २ । २ । १२ । संप्रतिकाले यो लट् तस्य शतृशानौ

( १ ) गोरघयवादितिकिम् । निरुतम् ।

( २ ) लिट् ग्रहणमन्यत्वान्तरत्वशंका निरासार्थम् ।

( ३ ) ननु पचतितरामित्यादौ शतृत्वः स्यादिति चेन्न । व्यवस्थित विभाषा श्रयणात् । व्यवस्थित विभाषानाम प्राप्ताप्राप्त विभाषेत्यर्थः ।

यजयाचयतविच्छप्रच्छरक्षस्वपो नङ्। २। ३। ७२। यत्नः। यज्ञः। याञ्चा। विश्नः। प्रश्नः। रक्ष्णः। स्वप्नः। गौ भोः किः। २। ३। ७३। प्रधिः। उपाधिः। (१)स्त्रियां क्तिः। २। ३। ७५। स्त्रीलिङ्गे भावे क्तिः स्यात्। घञोऽपवादः। कृतिः। स्तुतिः। [संपदादिभ्यः क्विबपि वक्तव्यः] संपत्। (२) विपत्। ऋल्वादिभ्यः क्तिस्तवद्भवतीति वक्तव्यम्। कीर्णिः। गीर्णिः। लूनिः। पूनिः। यूतिजूति सातिहेति कीर्तयः। २। ३। ७८। एते निपात्यन्ते। ज्वरत्वरस्रिव्यविमवां वोकौ। ४। ४। १८। ज्वरादीनां वकारस्योङ्श्च ऊर्भवति झलादौ क्वौ च परे। जूः। तूः। स्रूः। ऊः। मूः। इ(३)च्छा। २। ३। ८२। इषेर्निपातोऽयम्। अः स्यात्। २। ३। ८४। स्यान्तेभ्यो धुभ्यः स्त्रियाम त्यो भवति। चिकीर्षा। पुत्रकाम्या। सरोर्हलः। २। ३। ८५। सरहलन्तो यो धुः ततः स्त्रियामस्त्यो भवति। ईहा। ण्यास-श्रन्थघट्टिवन्दिविदो युच्। २। ३। ८९। एतेभ्यो धुभ्यः स्त्रियां युच् भवति। कारणा। श्रन्थना। घट्टना। वन्दना। वेदना। नञ्भावे क्तः। २। ३। ७५ युट्। २।

(१) घञादीनामपवादोऽयम्।

(२) क्त्यपीष्यते—संपत्तिः, विपत्तिः, आपत्तिः।

(३) इषेर्भावे स्त्रीयांशः यगभावश्च निपात्यतो केरपवादोऽयम्।

# अथविभक्त्यर्थाः ।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । २ । ३ । ४६ ।

मिङ्कैका(१) र्थे वाः । १ । ४ । ५४ । मिङ्न्तेन पदेनैकार्थे वर्तमानाच्छब्दो वा भवति । गौश्च(६)रति । कुमारीतिष्ठति । ओदनः पच्यते । जिनः । श्रीः । ज्ञानम् । तटः । तटी । तटम् । द्रोणो व्रीहिः । एकः । द्वौ । बहवः । ( सम्बोधने(२) ऽपि मिङ्कैकार्थे वाः ) हे देवदत्त । ( इति वाः ) । क(३)र्त्रीप्सितम् । १ । २ । ११९ । कर्त्रा क्रियया यदाप्यं तत्कारकं कर्मसंज्ञं भवति । कर्म(४)णीप् । १ । ४ । २ । अनुक्ते कर्मणि कारके इब्भवति ।

---

(१) गौश्चरतीत्यादौ गोशब्दस्यान्वयः क्रियायामेवजायतेऽभयोरप्यन्वयान्वयीभावत्वेनैकार्थोपस्थितिजनकत्वात् ननुचरतीतिकर्त्रर्थफलकारणगोशब्दनिष्ठकर्त्रर्थस्याभिहितत्वात्कथं वा विभक्तिर्भवतीति चेन्न । मिङ् सामानाधिकरण्ये वा विभक्तिर्भवतीति व्याख्यात् । अत एव उक्तार्थानामप्रयोग इति नियमस्तुन प्रवर्तते ।

(२) प्रजानीध्यादि क्रिया गम्यते अत एव क्रियाविशेषणमेतत् ।

(३) धूपात्तव्यापाराश्रयत्वं कर्तृत्वम् ।

(४) कर्मत्वञ्चप्रकृतधूपात्तव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनेच्छा विषयत्वम् ।

मम । व्रीहिशालेर्ढक् । ५ । ४ । १२८ । व्रैहेयम् । शालेयम् । तदस्य संजातं तारकादिभ्य इतच् । ५ । ४ । १५८ । तारकितं नभः । प्रमाणे द्वयसज्दघ्नञ्मात्रचः । ५ । ४ । १५९ । ऊरुप्रमाणमस्य ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् । यत्तदेतेभ्यः (१)परिमाणे वतुप् । ५ । ४ । १६१ । आ सर्वनाम्नः । ४ । ३ । १७१ । सर्वनाम्न आकारान्तादेशो भवति दृग्दृशवतुषु परतः । यत्परिमाणमस्य यावान् । तावान् । एतावान् । संख्याया अवयवे तयप् । ५ । ४ । १६५ । दशावयवा अस्य दशतयो धर्मः । सप्ततयी नयवृत्तिः । द्वित्रिभ्यां वा । ५ । ४ । १६६ । आभ्यां परस्य तयस्यायो वा स्यात् । द्वयम् । द्वितयम् ॥ इत्यादि । उभात् स्वम् । ५ । ४ । १६६ । उभावयवावस्य—उभयो मणिः । तस्य पूरणे डट् । ५ । ४ । ११ । एकादशानां पूरण एकादशो जिनः । नोऽसंमट् । ५ । ४ । १२ । नान्तायाः संख्याया असे मट् । पञ्चानां पूरणः पञ्चमः । षट्कतिपयचतुरां थुक् । ५ । ४ । १३ । एषां डति थुगागमः । षण्णां पूरणः षष्ठः । कतिथः । [अर्थवशाद्विभक्तित्वेन डटो विपरिणामः ।] अत एव डट् । कतिपयथः । चतुर्थः । द्वेस्तीयः । ५ । ४ । १६ । डटोऽ-

(१) आयामस्तु प्रमाणं स्यात्परिमाणं तु सर्वतः इति प्रमाणपरिमाणयोर्भेदः ।

